Impact Factor: 5.731

IJETIR

ISSN (Online) 2583-0554

International Journal of Emerging Technologies and Innovative Research (IJETIR)

Volume 5, Issue 2, February 2025

# ध्वनितत्त्वविमर्शः

अमरेन्द्र कुमार मिश्रः
सहाचार्य (साहित्य विभागः)
कालियाचक विक्रम किशोर आदर्श संस्कृत महाविद्यालयः
पूर्वमेदिनीपुरं, पश्चिमबङ्गः

ध्वन्यालोककार आनन्दवर्धनाचार्यः ध्वनिसम्प्रदायस्य प्रवर्तकः । तस्य मतानुसारं काव्यस्यात्मा ध्वनिरिति सिद्धान्तः बुधैः समाम्नातपूर्वः । आनन्दवर्धनो ध्वनिविरोधिनां मतानि खण्डयित्वा, ध्वनेः स्वरूपं भेदोपभेदांश्च प्रतिपाद्य, ध्वनेः काव्यात्मत्वं व्यवस्थापितवान् । बुधैः ध्वनिशब्दस्य व्युत्पत्तिः पञ्चधा क्रियते-

(१) ध्वनति ध्वनयति वा यः स व्यञ्जकः शब्दो ध्वनिः।

(२) ध्वनति ध्वनयति वा यः स व्यञ्जकोऽर्थो ध्वनिः ।

(३) ध्वन्यते यः स व्यङ्ग्योऽर्थो ध्वनिः ।

(४) ध्वन्यते अनेन इति व्यञ्जनाव्यापारो ध्वनिः

(५) ध्वन्यतेऽस्मिन्निति ध्वनिः अर्थात् यस्मिन् वस्त्वलङ्काररसादयो ध्वनिताः भवन्ति तत्काव्यं ध्वनिकाव्यम्।

ध्वनिसिद्धान्तः स्फोटवादश्च ध्वनिवादिनो वैयाकरणानां स्फोटसिद्धान्तम् अनुसरन्ति। तदुक्तं ध्वन्यालोके- "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैः तन्मतानुसारिभिः काव्यतत्त्वार्थदर्शिभिः वाच्यवाचक-सम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरिति।

ध्वन्यालोकस्य प्रथमोद्योते आनन्दवर्धनाचार्यः मङ्गलपद्यं कुर्वन् काव्यस्यात्मा ध्वनिः इति उद्घोषयति। तद्यथा-

काव्यस्यात्मा ध्वनिरिति वुधैर्यसः माम्नातपूर्व-
तस्याभावं जगदूपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम् ।। इति ।१

तस्मिन् समये ध्वनिविषये प्रमुखतया तिस्रः विप्रतिपत्तयः आसन् । केचन ध्वनेः अभावं प्रतिपादयामासुः । अन्ये तं ध्वनिं गूणवृत्तीति प्रतिपादितः, अपरे अनीर्वचनीय इति कथितवन्तः ।

अभाववादीनां मतमालोच्य ध्वन्यालोककारः आनन्दवर्धनाचार्यः सहृदयश्लाघ्यार्थः द्विविधः इति स्वीकरोति । यथा - वाच्यः प्रतीयमानश्च । तदुक्तं -

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदाबुभौ स्मृतौ ।।२

अर्थात् काव्यस्य हि ललितोचितसन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यः येऽर्थः तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ ।

तत्र वाच्यः उपमादिरूपेण प्रसिद्धः भवति । अतः प्रतीयनार्थः यथा -

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिनाङ्गनासु ।।३

यथा अङ्गनासु लावण्यं पृथकरूपेण परिदृश्यते तथा महाकविनां वाणीसु प्रतीयमानार्थः भवति । परन्तु ये कथयन्ति यः वाच्यः सः प्रतीयमानः तेषां मतं खण्डयितुम् आनन्दवर्धनः वाच्यप्रतीयमानयोः मध्ये पञ्चभेदान् उपस्थापयति ।

१) क्वचिद्वाच्यः विधिरूपः प्रतीयमानः निषेधरूपः यथा -

भ्रम धार्मिक-विस्रब्धः स शुनकोऽद्य मारितस्तेन ।

गोदावरीनदीकुललतागहनवासिना दृप्तसिंहेन ।।४ इति

२) क्वचिद्वाच्यः निषेधरूपः प्रतीयमानः विधिरूपः यथा -

श्वश्रूरत्र शेते अथवा निमज्जति अत्राहं दिवसकं प्रलोक्य ।

मा पथिक रात्र्यन्ध राय्यायामावयोः शयिष्ठाः ।।५ इति

३) क्वचिद्वाच्यः विधिरूपः प्रतीयमानः अनुभयरूपो यथा -

व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि ।

मा तवापि तया विना दाक्षिण्यहतस्य जनिषत ।।६ इति

४) क्वचिद्वाच्यः प्रतिषेधरूपः प्रतीयमानः अनुभयरूपो । यथा -

प्रार्थये तावत्प्रसीद निवर्तस्य मुखशशिज्योत्स्नाविलुप्ततमोनिवहे ।

अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे ।।७ इति

५) क्वचिद्वाच्याद्विभिन्नविषयत्वेन व्यवस्थितो यथा -

कस्य वा न भवति रोषो दृष्टा प्रियायाः सव्रणमधरम्

सभ्रमरपद्माघ्रणशीले वारितवामे सहस्वेदानीम् ।।८ इति

प्रतीयमानार्थः त्रिविधः यथा - वस्तुः, अलंकारः, रसः इति । तत्र वस्तुः वाच्यः भवति व्यङ्ग्यमपि भवति, अलंकारोऽपि तथा, परन्तु रसः कदापि न वाच्यः स तु वाच्यार्थात् भिन्नः अर्थात् व्यङ्ग्यरूपः । यदि कोऽपि शङ्काग्रस्तो भवति यत् प्रतीयमानस्य अन्यभेदाः सन्ति परन्तु रसरूपप्रतीयमानस्य प्राधान्यं कथम् ? अस्य उत्तरे आनन्दवर्धनः कथयति -

एकदा महाकविवाल्मीकिः स्नानादिकार्यं समापनाय तमसानदीं प्रति गतवान् । तत्र मार्गे एकः व्याधः कौञ्चमिथुनादेकं मारितवान्, अपरस्य दुःखं दृष्टा वाल्मीकेः मुखात् शोकात्मकः श्लोकः आगतः । यथा -

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।

कौञ्चद्वन्द्व वियोगोत्थः शोकः श्लोकत्वमागतः ।९ इति

अत्र श्लोके करुणरसः अङ्गीत्वेन वर्तते । शोको हि करुणस्यस्थायिभावः । अतः समादधति - प्रतीयमानस्य चान्यभेददर्शनेऽपि रसाभावमुखेनैवोपलक्षणंप्राधान्यात् इति ।

अनन्तरम् आनन्दवर्धनः ध्वत्यालोके ध्वनेस्वरूपम् एवं वर्णितवान् -

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।

व्यंक्तः काव्यविशेषः स ध्वनिरिरिति सुरिभिः कथितः ।।१० इति

अर्थात् यत्र शब्दः स्वम् आत्मानं तथा च निजार्थम् उपसर्जनी करोति, यत्र अर्थः स्वम् अर्थम् उपसर्जनी करोति, व्यङ्ग्यार्थस्य प्राधान्यं भवति तत्र ध्वनिः भवति । अर्थात् यत्र शब्दार्थयोः अप्राधान्यं व्यङ्गयार्थस्य च प्राधान्यं भवति तत्र ध्वनिः भवतीति सुरिभिः कथितः । अत्र 'वा' शब्दः समुचयार्थः वर्तते ।

यत्र स्वार्थत्यागेन गुणीभूती शब्दार्थी प्रतीयमानार्थ व्यङ्क्तः स काव्यविशेषो ध्वनिसंज्ञितः। अत्र ध्वनिकारेण वैयाकरणानां मतम् अनुसृतम् । तदुक्तं तेन "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैः तन्मतानुसारिभिः काव्यतत्त्वार्थदर्शिभिः वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।

ध्वनिकाव्यस्य भेदद्वयमस्ति (१) अविवक्षितवाच्यध्वनिः (२)विवक्षितान्यपरवाच्यध्वनिश्चेति। तद्याद्यः लक्षणामूलकः द्वितीयश्च अभिधामूलकः। आद्ये वाच्यस्य विवक्षा न भवति द्वितीये च तद्विवक्षा भवति। अविवक्षितवाच्यध्वनिर्यथा-

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।

शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।११।।

वस्तुतः न तु पृथिव्याः लतात्वं सम्भवति नापि तत्र सुवर्णपुष्पस्थितिः तच्चयनं वा। अतोऽत्र मुख्यार्थबाधे सति लक्षणया विपुलधनस्य तदनायासोपार्जनसुलभायाः समृद्धिसम्भारभाजनतायाश्च बोधो भवति। लक्षणाप्रयोजनं शूरादिप्राशस्त्यं सौन्दर्यातिशयरूपेण व्यज्यते।

विवक्षितान्यपरवाच्यध्वनिः यथा-

शिखरिणि क्व नु नाम कियच्चिरं, किमभिधानमसावकरोत्तपः

सुमुखि बेन तवाधरपाटलं, दशति विम्बफलं शुकशावकः ॥१२।।

अत्र शुकशिशोः विम्बफलास्वादनक्रियायाः प्रसिद्धेः वाच्यार्थो विवक्षित एव, परन्तु तथाविधकथने वक्तुः यः नायिकाधरपानरूपः प्रच्छन्नाभिप्रायः तस्यापि बोधनात् विवक्षितोऽपि वाच्यार्थः अन्यपरः सम्पद्यते।

अविवक्षितवाच्यध्वनेः अर्थान्तरसंक्रमितवाच्यः प्रभेदो यथा-

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्वलाका घना

वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे

वैदही तु कथं भविष्यति हहा हा देवि धीरा भव ॥१३।।

अत्र रामशब्दः अर्थान्तरसङ्क्रमितवाच्यः । अनेन हि दुःखसहिष्णुत्वविशिष्टः रामः प्रत्याय्यते ।

अत्यन्ततिरस्कृतवाच्यो यथा-

रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः ।

निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।।१४।।

अत्र अन्धशब्दः अत्यन्ततिरस्कृतवाच्यः । अत्र अप्रकाशातिशयः व्यज्यते ।

IJETIR
ISSN (Online) 2583-0554
International Journal of Emerging Technologies and Innovative Research (IJETIR)
Volume 5, Issue 2, February 2025
Impact Factor: 5.731

ध्वनिकारः "काव्यस्यात्मा ध्वनिरिति" स्वकीयं मतं बलीयसीभिः युक्तिभिः, पुष्टैः तर्कैः, प्रबलैः प्रमाणैश्च प्रतिपाद्य तस्य युक्ततां साधयामास । अतएव ध्वनिसिद्धान्तस्य महत्त्वम् अलङ्कारशास्त्रे सुस्थापितमिति दिक्।

पादटिप्पणी

१. ध्वन्यालोक: - प्रथम उद्योत: - ०१

२. ध्वन्यालोक: - प्रथम उद्योत: - ०२

३. ध्वन्यालोक: - प्रथम उद्योत: - ०४

४. ध्वन्यालोक: - प्रथम उद्योत: - पृ - ५२

५. ध्वन्यालोक: - प्रथम उद्योत: - पृ - ७१

६. ध्वन्यालोक: - प्रथम उद्योत: - पृ - ७३

७. ध्वन्यालोक: - प्रथम उद्योत: - पृ - ७४

८. ध्वन्यालोक: - प्रथम उद्योत: - पृ - ७६

९. ध्वन्यालोक: - प्रथम उद्योत: - ०५

१०. ध्वन्यालोक: - प्रथम उद्योत: - १३

११. ध्वन्यालोक: - प्रथम उद्योत: - पृ – २८३

१२. ध्वन्यालोक: - प्रथम उद्योत: - पृ – २८४

१३. ध्वन्यालोक: - द्वितीय उद्योत: - पृ – ३४२

१४. ध्वन्यालोक: - द्वितीय उद्योत: - पृ – ३५१

Copyright to IJETIR
www.iciset.in

IJETIR
ISSN (Online) 2583-0554
International Journal of Emerging Technologies and Innovative Research (IJETIR)
Volume 5, Issue 2, February 2025
Impact Factor: 5.731

ग्रन्थसंकेतः

१. ध्वन्यालोकः (लोचनसहितः, प्रकाश हिन्दीव्याख्योपेतश्च) – व्याख्याकारः आचार्यजन्ननाथपाठकः, चौखम्बा विद्याभवन वाराणसी।

२. ध्वन्यालोकः (लोचनसहितः, प्रकाश हिन्दीव्याख्योपेतश्च) व्याख्याकार: - शिवप्रसाद द्विवेदी - चौखम्बा सुरभारती प्रकाशन वाराणसी।

३. ध्वन्यालोकः - व्याख्याकार: - आचार्य लोकमणि दाहाल: -भारतीय विद्या प्रकाशन

४. साहित्यदर्पणम् (चन्द्रकला संस्कृत-हिन्दी व्याख्योपेतम्) – व्याख्याकारः आचार्य शेषराजशर्मा रेग्मी, चौखम्बा कृष्णदास अकदमी, वाराणसी।

५. काव्यप्रकाशः – झलकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्याटीकया समन्वितः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली।